ग्रं. क्रं- ५.

ललित स्तोत्र - अपूर्ण

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः नारायणकवचप्रारंभः ॐ ॐनमः पादाभ्यांनमः ॐनंमः नं
जानुभ्यांनमः॥ॐ मंनमः ऊरुभ्यांनमः ॐ नांनमः उदराय॰ ॐ रांनमः हृदया॰
ॐ यंनमः उरसे॰ ॐ णांनमः मुखाय॰ ॐ यंनमः शिरसे॰ ॐ ॐ दक्षिणतर्जन्ये॰
ॐ ॐ दक्षिणतर्जन्ये॰ ॐ नंमध्यमाये॰ ॐ मों अनामिकाये॰ ॐ भंकनिष्ठिकाये॰
ॐ गं वामतर्जन्ये॰ ॐ वंमध्यमाये॰ ॐ तें अनामिकाये॰ ॐ वांकनिष्ठिकाये॰
ॐ सुंदक्षांगुष्ठप्रथमपर्वणे॰ ॐ देंदक्षांगुष्ठांत्यपर्वणे॰ ॐ वांवामांगुष्ठप्रथमपर्वणे॰
ॐ यंवामांगुष्ठांत्यपर्वणे॰ अथविद्यामंत्रन्यासः ॐ ॐ हृदयाय॰ ॐ विंमूर्ध्ने॰
ॐ षंभ्रूमध्याय॰ ॐ णंशिखायैवषट् ॐ वंनेत्रत्रयायवौषट् ॐ नंसर्वसं
धिभ्योनमः ॐ नमः अस्त्रायफट्॥अथनारायणवर्म॥राजोवाच॥ययागुप्तः
सहस्राक्षःसहावान्रिपुसैनिकान् क्रीडन्निवविनिर्जित्यत्रिलोक्याबुभुजेश्रियं १

Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

ना॰क॰व॰ भगवन्तन्ममाख्याहिवर्मनारायणात्मकं॥यथातथाहिनःशत्रून्येनगुप्तो
१ जयन्मृधे २ श्रीबादरायणिरुवाच वृत्तःपुरोहितस्त्वाष्ट्रोमहेंद्रायानुपृच्छते॥
(२) नारायणाख्यंवर्माहतदिहैकमनाःशृणु ३ विश्वरूपउवाच धौतांघ्रिपाणि
राचम्यसपवित्रउदङ्मुखः॥कृतस्वांगकरंन्यासोमंत्राभ्यांवाग्यतःशुचिः ४
नारायणमयंवर्मसंनह्येद्भयआगते॥दैवभूतात्मकर्मभ्योनारायणमयःपुमा
न् ५ पादयोर्जानुनोरूर्वोरुदरेहृद्यथोरसि॥मुखेशिरस्यानुपूर्व्यादोंकारा
दीनिविन्यसेत् ६ ॐनमोनारायणायेतिविपर्ययमथापिवा करंन्यासंत
तःकुर्याद्द्वादशाक्षरविद्यया ७ प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु॥न्य राम
सेद्धृदयओंकारंविकारमनुमूर्धनि॥षकारंतुभ्रुवोर्मध्येणकारंशिखया ९

दिशेत्॥वेंकारंनेत्रयोर्युंज्यान्नकारंसर्वसंधिषु ९ मकारवस्त्रमुद्दिश्यमंत्र
मूर्तिर्भवेद्बुधः॥सविसर्गंषडंगंतुसर्वदिक्षुविनिर्दिशेत् १० ॐविष्णवेन
मइति आत्मानंपरमंध्यायेध्येयंषट्शक्तिभिर्युतं विद्यातेजस्तपोमूर्ति
रिमंमंत्रमुदाहरेत् ११ हरिर्विदध्यान्ममसर्वरक्षांन्यस्तांघ्रिपद्मःपतगेंद्र
पृष्ठे॥दरारिचर्मासिगदेषुचापपाशान्दधानोष्टगुणोष्टबाहुः १२ ज
लेषुमांरक्षतुमत्स्यमूर्तिर्यादोगणेभ्योवरुणस्यपाशात् स्थलेषुमाया
वटुवामनोव्यात्त्रिविक्रमःखवतुविश्वरूपः १३ दुर्गेष्वटव्याजिमुखा
दिषुप्रभुःपायान्नृसिंहोसुरयूथपारिः॥विमुंचतोयस्यमहाट्टहासं
दिशोविनेदुर्न्यपतंश्चगर्भाः॥ १४ रक्षत्वसौमाध्वनियज्ञकल्पःस्वदं

ना॰क॰ ष्ट्रयोन्नीतधरोवराहः॥रामोद्रिकूटेष्वथविप्रवासेसलक्ष्मणोव्याद्भरताग्रजो

२ मां १५ मामुग्रधर्मादखिलात्प्रमादान्नारायणःपातुनरश्चहासात् दत्तस्त्व

(3) योगादथयोगनाथःपायाद्गुणेशःकपिलःकर्मबंधात् १६ सनत्कुमारोव

तुकामदेवाद्धयशीर्षामांपथिदेवहेलनात् देवर्षिवर्यःपुरुषार्चनांतरात्कू

र्मोहरिर्मांनिरयादशेषात् १७ धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वाद्भयादृष

भोनिर्जितात्मा॥यज्ञश्चलोकादवताज्जनांताद्बलोगणात्क्रोधवशादहींद्रः॥

१८ द्वैपायनोभगवानप्रबोधाद्बुद्धश्चपाषंडगणात्प्रमादात्॥कल्किःकलेः

कालमलात्प्रपातुधर्मावनायोरुकृतावतारः १९ मांकेशवोगदयाप्रातरव्या राम

द्गोविंदआसंगवआत्तवेणुः॥नारायणःप्राह्णउदारशक्तिर्मध्यंदिनेविष्णु २

(3A)

रीं द्रपाणिः २० देवोपराह्णमधुहोग्रधन्वासायंत्रिधामावतुमाधवोमां॥
दोषेहृषीकेशउत्तरार्धरात्रेनिशीथएकोवतुपद्मनाभः २१ श्रीवत्सधा
मापररात्रईश्वरोसिधरोजनार्दनः॥दामोदरोव्यादनुसंध्यंप्रभातेविश्वे
श्वरोभगवान्कालमूर्तिः २२ चक्रंयुगांतानलतिग्मनेमिभ्रमत्समंता
द्भगवत्प्रयुक्तं दंदग्धिदंदग्ध्यरिसैन्यमाशुकक्षंयथावातसखोहुताश
न न: २३ गदेशनिस्पर्शनविस्फुलिंगेनिष्पिंढिनिष्पिंड्यजितप्रियोसि॥कू
ष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णयचूर्णयारीन् २४ त्वंयातुधा
नप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् दरेंद्रविद्रावयकृष्णपू
रितोभीमस्वनोरेर्हृदयानिकंपयन् २५ त्वंतिग्मधारासिवरारिसै

ना० कव० न्यमीशप्रयुक्तोममछिंधिछिंधि ।। चक्षूंषिचर्मन्छतचंद्रछादयन्द्विषांमघो
३ नाहरपापचक्षुषां २६ यंनोभयंग्रहेभ्योभूत्केतुभ्योनृभ्यएवच सरीसृ
(५) पेभ्यादंष्ट्रिभ्योभूतभ्योघ्येभ्यएवच २७ सर्वाण्येतानिभगवान्नामरूपा
स्त्रकीर्तनात् ।। प्रयांतुसंक्षयंसद्योयेन्यश्रेयःप्रतीपकाः २८ गरुडोभग
वांस्तोत्रंस्तोमश्छंदोमयःप्रभुः ।। रक्षत्वशेषकृछ्रेभ्योविष्वक्सेनोस्वनाम
भिः २९ सर्वापाद्भ्योहरेर्नामरूपयानायुधानिनः ।। बुद्धींद्रियमनःप्राणा
न्पांतुपार्षदभूषणाः ३० यथाहिभगवानेववस्तुतःसदसच्चयत् ।। सत्ये
नानेननःसर्वेयांतुनाशमुपद्रवाः ३१ यथैकात्म्यानुभावानांविकल्प्यर हेरंब
हितःस्वयं ।। भूषणायुधलिंगाख्याधत्तेशक्तीःस्वमायया ३२ तनैवस ३

Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)



॥ इतिमांडुक्योपनिषद्समाप्तं ॥



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6)

प्रणवंह्यीश्वरं विद्यात्सर्वस्यहृदयेस्थितं ॥ सर्वव्यापिनमोंकारंमत्वाधीरोनशोचति ॥ ५
॥ अमात्रोनंतमात्रश्चद्वैतस्योपशमःशिवः ॥ ओंकारोविदितोयेनसमुनिर्नेतरोज-
नः ॥ ६ ॥ भद्रंकर्णे• ॥ स्वस्तिनइंद्रो॰ ॥ २ ॥ ॐ शांतिः ॥ ३ ॥ ॐ ब्रह्माहमस्मीति
स्मर ॥ यज्ञोपवीतंवेदांश्च सर्वंतद्वर्जयेद्यतिः स्नानं दानं तथाशौचमद्भिः पूताभि
राचरेत् ॥ उपनिषदि ॥ ओंकारोवागेवेद सर्वंतस्यशाद्धमिवेहास्तिचिन्मयोह्ययमोंका
रश्चिन्मयमिदंसर्वं तस्मात्परमेश्वरएवैकमेवतद्भवत्येतदमृतमभयमेतद्ब्रह्माऽभ
यंहिवैब्रह्मभवतियएवंवेद ॥ ॥ इतिमांडुक्यसमाप्तः ५ ॥ ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(6A)

मांडुक्यो०
३

निश्चितः॥ सपूज्यः सर्वभूतानांवंद्यश्चैवमहामुनिः॥ ४॥अकारोनयतेविश्वमु
कारश्चापितैजसं॥ मकारश्चपुनः प्राज्ञंनाऽमात्रेविद्यतेगतिः॥ ५ ॥अमात्रश्चतु
र्थोव्यवहार्यः प्रपंचोपशमः शिवोद्वैत एव मोंकारआत्मैव संविशत्यात्मनात्मानंयऽ
एवंवेद॥ इत्युपनिषत्॥ १॥ तत्रैतेश्लोकाभवंति ॥ ॐ कारं पादशोविद्यात्पा
दामात्रानसंशयः॥ॐ कारंपादशोज्ञात्वानकिंचिदपिचिंतयेत्॥ १॥ युंजीतप्र
णवेचेतः प्रणवोब्रह्मनिर्भयं॥ प्रणवेनित्ययुक्तस्यनभयंविद्यतेक्वचित्॥ २॥प्र
णवोह्यपरंब्रह्मप्रणवश्चपरः स्मृतः॥ अपूर्वोनंतरोबाह्योनपरः प्रणवोव्ययः॥३॥
सर्वस्यप्रणवोह्यादिमध्यमंतस्तथैवच॥ एवंहिप्रणवंज्ञात्वाव्यश्नुतेतदनंतरं॥ ४॥ ३

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

जागरितस्थानोवैश्वानरोकारःप्रथमामात्राआप्तेरादिमत्वाद्वा आप्नोतिहवैसर्वान्कामाना
दिश्चभवतियएवंवेद॥स्वप्नस्थानस्तैजसउकारोद्वितीयामात्रोत्कर्षादुभयत्वाद्वोत्कर्षति
हवैज्ञानसंततिंसमानश्चभवतिनास्याब्रह्मवित्कुलेभवतियएवंवेद॥सुषुप्तस्थानो
प्राज्ञोमकारस्तृतीयामात्रामितेरपितेर्वामिनोतिहवाइदंसर्वमपीतिश्चभवतियएवं
वेद॥अत्रैतेश्लोकाभवंति॥विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटं॥मा=
त्रासंप्रतिपत्तौस्यादाप्तिसामान्यमेवच॥१॥तैजसस्योत्वविज्ञानेउत्कर्षोदृश्यतेस्फु
टं॥मात्रासंप्रतिपत्तौस्यादुभयत्वंतथाविधं॥२॥मकारभावेप्राज्ञस्यमानसामान्यमु
त्कटं॥मात्राप्रतिपत्तौतुलयसामान्यमेवच॥३॥त्रिषुधामसुयत्तुल्यंसामान्यंवेत्ति

सं

(7A)

ल्पि

ष्टिरन्ये विकल्पिता ॥ ७ ॥ इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ॥ कालात्प्र
सूतिं भूतानां मन्यंते कालचिंतकाः ॥ ८ ॥ भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चा
परे ॥ देवस्यैष स्वभावोयमाप्तकामस्य का स्पृहा ॥ ९ ॥ नांतःप्रज्ञं न बहिःप्रज्ञं
नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञमदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिं
त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपंचोपशमं शांतं शिवमद्वैतं चतुर्थं मन्यंते स आत्मा
स विज्ञेयः ॥ अत्रैव श्लोका भवंति ॥ निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ॥ अद्वै-
स्तु तः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥ १ ॥ कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ
॥ प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ॥ २ ॥ नात्मानं न परांश्चैव न सत्यं नापि

(४)

मांडुक्यो०

२ ॥

चान्तं ॥ प्राज्ञः किंचनसंवेत्तितुर्यंतत्सर्वदृक्सदा ॥ ३ ॥ द्वैतस्याग्रहणंतुल्यमुभयोः
प्राज्ञतुर्ययोः ॥ बीजनिद्रायुतः प्राज्ञः साचतुर्येनविद्यते ॥ ४ ॥ स्वप्ननिद्रायुतावाद्यौ
प्राज्ञस्त्वस्वप्ननिद्रया ॥ ननिद्रांनैवचस्वप्नंतुर्येपश्यंतिनिश्चिताः ॥ ५ ॥ अन्यथागृ
ह्णतः स्वप्नोनिद्रातत्त्वमजानतः ॥ विपर्यासेतयोः क्षीणेतुरीयंपदमश्नुते ॥ ६ ॥ अनादि
माययासुप्तोयदाजीवः प्रबुध्यते ॥ अजमनिद्रमस्वप्नमद्वैतंबुध्यतेसदा ॥ ७ ॥ प्र
पंचोयदिविद्येतनिवर्तेतनसंशयः ॥ मायामात्रमिदंद्वैतमद्वैतंपरमार्थतः ॥ ८ ॥ वि
कल्पोविनिवर्तेतकल्पितोयदिकेनचित् ॥ उपदेशादयंवादोज्ञातेद्वैतंनविद्यते ॥ ९ ॥
सोयमात्माध्यक्षरमोंकारोधिमात्रंपादामात्रामात्राश्चपादाः ॥ अकारउकारोमकारइति

२ ॥

(8A)

श्रीगणेशायनमः ॥ॐ भद्रं० ॥ स्वस्ति० ॥ॐ शांतिः ३ ॥ ओमित्येतदक्षरमिदं
सर्वंतस्योपव्याख्यानं भूतंभवद्भविष्यदितिसर्वमोंकार एव यच्चान्यत्त्रिकालातीतंतदप्यों
कार एव सर्वं ह्येतद्ब्रह्मायमात्माब्रह्मसोयमात्माचतुष्पाज्जागरितस्थानोबहिः प्र
ज्ञः सप्तांगएकोनविंशतिमुखःस्थूलभुक्वैश्वानरः प्रथमःपादः स्वप्नस्थानोंतः
प्रज्ञः सप्तांगएकोनविंशतिमुखः प्रविविक्तभुक्तैजसोद्वितीयःपादः यत्रसुप्तोन
कंचनकामंकामयतेनकंचनस्वप्नंपश्यतितत्सुषुप्तंसुषुप्तस्थान एकीभूतः प्रज्ञा
नघन एवानंदमयो ह्यानंदभुक्चेतोमुखः प्राज्ञः स्तृतीयःपादःएषसर्वेश्वर एष
सर्वज्ञ एषोंतर्याम्येषयोनिःसर्वस्यप्रभवाप्ययौहिभूतानां ॥अत्रैतेश्लोकाभवंति॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(९)

मांडुक्यो० बहिः प्रज्ञो विभुर्विश्वो ह्यंतःप्रज्ञस्तु तैजसः ॥ घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृ
१ तः ॥ १ ॥ दक्षिणाक्षिमुखे विश्वो मनस्यंतस्तु तैजसः ॥ आकाशे च हृदि प्राज्ञ
स्त्रिधा देहे व्यवस्थितः ॥ २ ॥ विश्वो हि स्थूलभुङ् नित्यं तैजसः प्रविविक्तभु
क् ॥ आनंदभुक् तथा प्राज्ञस्त्रिधा भोगं निबोधत ॥ ३ ॥ स्थूलं तर्पयते विश्वं प्र
विविक्तं तु तैजसं ॥ आनंदं च तथा प्राज्ञं त्रिधा तृप्तिं विजानतः ॥ ४ ॥ त्रिषु धाम
सु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः ॥ वेदैतदुभयं यस्तु स भुंजानो न लिप्यते ॥ ५ ॥
प्रभवः सर्वभावानां सतामिति विनिश्चयः ॥ सर्वं जनयति प्राणश्चेतोंशून्पुरुषः
पृथक् ॥ ६ ॥ विभूतिं प्रसवं त्वन्ये मन्यंते कालचिंतकाः ॥ स्वप्नमायास्वरूपेति सृ

(9A)

योद्युक्तशक्तिविक्रमहर्षिता॥२७॥ नित्यापराक्रमाटोपनिरीक्षणसमुत्
सुका॥ भंडपुत्रवधोद्युक्तबालाविक्रमनंदिता॥२८॥ मंत्रिण्यंबाविरचि
तविषंगवधतोषिता॥ विशुक्रप्राणहरणवाराही॥ वीर्यनंदिता॥२९॥ कामेश्वर
मुखालोककल्पितश्रीगणेश्वरा॥ महागणेशनिर्भिन्नविघ्नयंत्रप्रहर्षिता॥३०॥
भंडासुरेंद्रनिर्मुक्तशस्त्रप्रत्यस्त्रवर्षिणी॥ करांगुलीनखोत्पन्ननारायणद
शाकृतिः॥३१॥ महापाशुपतास्त्राग्निनिर्दग्धासुरसैनिका॥ कामेश्वरास्त्रनि
र्दग्धासभंडासुरशून्यका॥३२॥ ब्रह्मोपेंद्रमहेंद्रादिदेवसंस्तुतवैभवा॥ हरने
त्राग्निसंदग्धकामसंजीवनौषधिः॥३३॥ श्रीमद्वाग्भवकूटैकस्वरूपमुखपं
कजा॥ कंठाधः कटिपर्यंतमध्यकूटस्वरूपिणी॥३४॥ शक्तिकूटैकतापन्न
कट्यधोभागधारिणी॥ मूलमंत्रात्मिकामूलकूटत्रयकलेवरा॥३५॥
कुलामृतैकरसिकाकुलसंकेतपालिनी॥ कुलांगनाकुलांतस्थाकौलि
नीकुलयोगिनी॥३६॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

८।०।

ललि अकुला समयांतस्छा समयाचारतत्परा॥मूलाधारैकनिलयाब्रह्मग्रंथिवि
भेदिनी॥३७॥ मणिपुरांतरुदिता विष्णुग्रंथिविभेदिनी॥आज्ञाचक्रांतराल
॥६॥ स्छारुद्रग्रंथिविभेदिनी॥३८॥ सहस्राराम्बुजारूढासुधासाराभिवर्षिणी॥त
डिल्लतासमरुचिःषट्चक्रोपरिसंस्छिता॥३९॥ महाशक्तिःकुंडलिनीबि
सतंतुतनीयसी॥भवानीभावनागम्याभवारण्यकुठारिका॥४०॥भद्रप्रिया
भद्रमूर्तिर्भक्तसौभाग्यदायिनी॥भक्तिप्रियाभक्तिगम्याभक्तिवश्याभयापहा॥४१
शांभवीशारदाराध्याशर्वाणीशर्मदायिनी॥शांकरीश्रीकरीसाध्वीशरच्चंद्र
निभानना॥४२॥शांतोदरीशांतिमती॥निराधारानिरंजना॥निर्लेपानिर्मला ॥रामा॥
नित्यानिराकारानिराकुला॥४३॥निर्गुणानिष्कलाशांतानिष्कामानिरुप ॥६॥
प्लवा॥नित्यमुक्तानिर्विकारानिष्प्रपंचानिराश्रया॥४४॥नित्यशुद्धानित्य
बुद्धानिरवद्यानिरंतरा॥निष्कारणानिष्कलंकानिरुपाधिर्निरीश्वरा॥४५॥ः

Joint Project of the Rajwade Sanshodhak Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(10A)

नीरागा रागमथनी निर्मदा मदनाशिनी ॥ निश्चिंता निरहंकारा निर्मोहा
मोहनाशिनी ॥ ४६ ॥ निर्ममा ममताहंत्री निष्पापा पापनाशिनी ॥ निष्क्रोधा
क्रोधशमनी निर्लोभा लोभनाशिनी ॥ ४७ ॥ निःसंशया संशयघ्नी निर्भवा
भवनाशिनी ॥ निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी ॥ ४८ ॥ निर्नाशा
मृत्युमथनी निष्क्रिया निष्परिग्रहा ॥ निस्तुला नीलचिकुरा निरपाया नि
रत्यया ॥ ४९ ॥ दुर्लभा दुर्गमा दुर्गा दुःखहंत्री सुखप्रदा ॥ दुष्टदूरा दुराचार
शमनी दोषवर्जिता ॥ ५० ॥ सर्वज्ञा सांद्रकरुणा समानाधिकवर्जिता ॥ सर्व
शक्तिमयी सर्वमंगला सद्गतिप्रदा ॥ ५१ ॥ सर्वेश्वरी सर्वमयी सर्वमंत्रस्वरू
पिणी ॥ सर्वयंत्रात्मिका सर्वतंत्ररूपा मनोन्मनी ॥ ५२ ॥ माहेश्वरी महा
देवी महालक्ष्मीर्मृडप्रिया ॥ महारूपा महापूज्या महापातकनाशिनी ॥ ५३
महामाया महासत्वा महाशक्तिर्महारतिः ॥ महाभोगा महैश्वर्या महावी
र्या महाबला ॥ ५४ ॥

१९॥

ललि॰ महाबुध्दिर्महासिध्दिर्महायोगेश्वरेश्वरी ॥ महातंत्रा मंत्रा महायंत्रा म
हासना ॥५५॥ महायागक्रमाराध्या महाभैरवपूजिता ॥ महेश्वरमहा
॥७॥ कल्पमहातांडवसाक्षिणी ॥५६॥ महाकामेशमहिषी महात्रिपुरसुंदरी ॥
चतुःषष्ट्युपचाराढ्या चतुःषष्टिकलामयी ॥५७॥ महाचतुःषष्टिकोटियो
गिनीगणसेविता ॥ मनुविद्या चंद्रविद्या चंद्रमंडलमध्यगा ॥५८॥ चा
रुरूपा चारुहासा चारुचंद्रकलाधरा ॥ चराचरजगन्नाथा चक्रराजनि
केतना ॥५९॥ पार्वती पद्मनयना पद्मरागसमप्रभा ॥ पंचप्रेतासनासीना
पंचब्रह्मस्वरूपिणी ॥६०॥ चिन्मयी परमानंदा विज्ञानघनरूपिणी ॥ ध्यानध्या ॥राम॥
तृध्येयरूपा धर्माधर्मविवर्जिता ॥६१॥ विश्वरूपा जागरिणी स्वपंती तैजसा ॥७॥
त्मिका ॥ सुप्ताप्राज्ञात्मिका तुर्या सर्वावस्थाविवर्जिता ॥६२॥ सृष्टिकर्त्री
ब्रह्मरूपा गोप्त्री गोविंदरूपिणी ॥ संहारिणी रुद्ररूपा तिरोधानकरीश्वरी ॥६३॥

(11A)

सदाशिवानुग्रहदा पंचकृत्यपरायणा ॥ भानुमंडलमध्यस्था भैरवी भगमा
लिनी ॥ ६४ ॥ पद्मासना भगवती पद्मनाभसहोदरी ॥ उन्मेषनिमिषोत्पन्नवि
पन्नभुवनावली ॥ ६५ ॥ सहस्त्रशीर्षवदना सहस्त्राक्षी सहस्त्रपात् ॥ आब्रह्म
कीटजननी वर्णाश्रमविधायिनी ॥ ६६ ॥ निजाज्ञारूपनिगमा पुण्यापुण्यफल
प्रदा ॥ श्रुतिसीमंतसिंदूरीकृतपादाब्जधूलिका ॥ ६७ ॥ सकलागमसंदो
हशुक्तिसंपुटमौक्तिका ॥ पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी ॥ ६८ ॥ अं
बिकानादिनिधना हरिब्रह्मेंद्रसेविता ॥ नारायणी नादरूपा नामरूपविवर्जि
ता ॥ ६९ ॥ ह्रींकारी ह्रीमती हृद्या हेयोपादेयवर्जिता ॥ राजराजार्चिता राज्ञी
रम्या राजीवलोचना ॥ ७० ॥ रंजनी रमणी रस्या रणत्किंकिणिमेखला ॥ रमा रा
केंदुवदना रतिरूपा रतिप्रिया ॥ ७१ ॥ रक्षाकरी राक्षसघ्नी रामा रमणलंपटा ॥
काम्या कामकलारूपा कदंबकुसुमप्रिया ॥ ७२ ॥ कल्याणी जगतीकंदा करु

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com